শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩০

*ৱামনাৱতারৱর্ণনম্*

শক্রেণ সংযতি হতোপি বলির্মহাত্মা
শুক্রেণ জীৱিততনুঃ ক্রতুৱর্ধিতোষ্মা।
ৱিক্রান্তিমান্ ভযনিলীনসুরাং ত্রিলোকীং
চক্রে ৱশে স তৱ চক্রমুখাদভীতঃ॥ ১ ॥

পুত্রার্তিদর্শনৱশাদদিতির্ৱিষণ্ণা
তং কাশ্যপং নিজপতিং শরণং প্রপন্না।
ত্বতপূজনং তদুদিতং হি পযোৱ্রতাখ্যং
সা দ্বাদশাহমচরত্ ত্বযি ভক্তিপূর্ণা॥ ২ ॥

তস্যাৱধৌ ত্বযি নিলীনমতেরমুষ্যাঃ
শ্যামশ্চতুর্ভুজৱপুঃ স্বযমাৱিরাসীঃ।
নম্রাং চ তামিহ ভৱত্তনযো ভৱেযং
গোপ্যং মদীক্ষণমিতি প্রলপন্নযাসীঃ॥ ৩ ॥

ত্বং কাশ্যপে তপসি সন্নিদধত্তদানীং
প্রাপ্তোসি গর্ভমদিতেঃ প্রণুতো ৱিধাত্রা।
প্রাসূত চ প্রকটৱৈষ্ণৱদিৱ্যরূপং
সা দ্বাদশীশ্রৱণপুণ্যদিনে ভৱন্তম্॥ ৪ ॥

পুণ্যাশ্রমং তমভিৱর্ষতি পুষ্পৱর্ষৈ-
র্হর্ষাকুলে সুরগণে কৃততূর্যঘোষে।
বধ্ৱাঞ্জলিং জয জযেতি নুতঃ পিতৃভ্যাং
ত্বং তত্ক্ষণে পটুতমং ৱটুরূপমাধাঃ॥ ৫ ॥

তাৱতপ্ৰজাপতিমুখৈৰুপনীয মৌঞ্জী-
দণ্ডাজিনাক্ষৱলযাদিভিৰৰ্চ্যমানঃ।
দেদীপ্যমানৱপুৰীশ কৃতাগ্নিকাৰ্য-
স্তৱং প্ৰাস্থিথা বলিগৃহং প্ৰকৃতাশ্বমেধম্॥ ৬ ॥

গাত্ৰেণ ভাৱিমহিমোচিতগৌৰৱং প্ৰা-
গ্ব্যাবৃণ্ৱতেৱ ধৰণীং চলযন্নযাসীঃ।
ছত্ৰং পৰোষ্মতিৰণাৰ্থমিৱাদধানো
দণ্ডং চ দানৱজনেষ্ৱিৱ সন্নিধাতুম্॥ ৭ ॥

তাং নৰ্মদোত্তৰতটে হযমেধশালা-
মাসেদুষি ত্বযি ৰুচা তৱ ৰুদ্ধনেত্ৰৈঃ।
ভাস্বান্ কিমেষ দহনো নু সনতকুমাৰো
যোগী নু কোযমিতি শুক্ৰমুখৈশ্শশঙ্কে॥ ৮ ॥

আনীতমাশু ভৃগুভিৰ্মহসাভিভূতৈ-
স্তৱাং ৰম্যৰূপমসুৰঃ পুলকাৱৃতাঙ্গঃ।
ভক্ত্যা সমেত্য সুকৃতী পৰিণিজ্য পাদৌ
তত্তোযমন্বধৃত মূৰ্ধনি তীৰ্থতীৰ্থম্॥ ৯ ॥

প্ৰহ্লাদৱংশজতযা ক্ৰতুভিৰ্দ্বিজেষু
ৱিশ্বাসতো নু তদিদং দিতিজোপি লেভে।
যত্তে পদাম্বু গিৰিশস্য শিৰোভিলাল্যং
স ত্বং ৱিভো গুৰুপুৰালয পালযেথাঃ॥ ১০ ॥

**********

www.prapatti.com